॥ श्रीः ॥

# ॥ श्रीशारदाभुजङ्गप्रयाताष्टकम् ॥

सुवक्षोजकुम्भां सुधापूर्णकुम्भां
प्रसादावलम्बां प्रपुण्यावलम्बाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ १

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ २

ललामाङ्कफालां लसद्गानलोलां
स्वभक्तैकपालां यशश्रीकपोलाम् ।
करेत्वक्षमालां कनत्प्रत्नलोलां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ३

सुसीमन्तवेणीं दृशानिर्जितैणीं
रमत्कीरवाणीं नमद्वज्रपाणीम् ।
सुधामन्थरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ४

सुशान्तां सुदेहां दृगन्तेकचान्तां
लसत्सल्लताङ्गीमनन्तामचिन्त्याम् ।
स्मृतां तापसैस्सर्गपूर्वस्थितां तां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ५

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ६

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं
भजन्मानसाम्भोज सुभ्रान्तभृङ्गीम् ।
निजस्तोत्रसङ्गीतनृत्यप्रभाङ्गीं
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ७

भवाम्भोजनेत्राजसम्पूज्यमानां
लसन् मन्दहासप्रभावक्त्र चिह्नाम् ।
चलच्चञ्चलाचारुताटङ्ककर्णां
भजे शारदाम्बामजस्रं मदम्बाम् ॥ ८

इति श्रीमच्छङ्कराचार्यविरचितं श्रीशारदाभुजङ्गं सम्पूर्णम् ॥

